योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०३५

पञ्चत्रिंशः सर्गः ३५

श्रीवसिष्ठ उवाच ।

देशाद्देशान्तरं दूरं प्राप्तायाः संविदः क्षणात् ।

यद्रूपममलं मध्ये परं तद्रूमात्मनः ।। १

गच्छन्श्रृण्वन्स्पृशञ्जिघ्रन्नुन्मिषन्निमिषन्हसन् ।

नूनं निरामयत्वाय नित्यमेतन्मयो भव ।। २

तत एव निराभासात्सत्यान्निर्वासनैषणात् ।

यथास्थितं यथाचारमचलाऽमरशैलवत् ।। ३

एतद्रूपमविद्यायाः प्रेक्षिता यन्न लभ्यते ।

प्रेक्षिता लभ्यते चेत्सा तद्विद्यैव पराभवत् ।। ४

अविद्यासंभवाच्चेत्यचित्त्वे संभवतः क्व किम् ।

चेत्यते कथमेवान्तः शान्तिरेव बलोदिता ।। ५

सत्यं ब्रह्म जगच्चैकं स्थितमेकमनेकवत् ।

सर्वं वाऽसर्ववद्भाति शुद्धं चाशुद्धवत्ततम् ।। ६

अशून्यं शून्यमिव च शून्यं वाऽशून्यवत्स्फुटम् ।

स्फारमस्फारमिव तदस्फारं स्फारसन्निभम् ।। ७

अविकारं विकारीव समं शान्तमशान्तवत् ।

सदेवासदिवादृश्यं तदेवातदिवोदितम् ।। ८

अविभागं विभागीव निर्जाड्यं जडवद्गतम् ।

अचेत्यं चेत्यभावीव निरंशं सांशशोभनम् ।। ९

अनहं सोऽहमिव तदनाशमिव नाशवत् ।

अकलङ्कं कलङ्कीव निर्वेद्यं वेद्यवाहिवत् ।। १०

आलोकि ध्वान्तघनवन्नववच्च पुरातनम् ।
परमाणोरपि तनु गर्भीकृतजगद्गणम् ।। ११
सर्वात्मकमपि त्यक्तदृष्टं कष्टेन भूयसा ।
अजालमपि जालाढ्यं चाशेषवदनेकधा ।। १२
निर्मायमपि मायांशुमण्डलामलभास्करम् ।
ब्रह्म विद्धि विदांनाथमपामिव महोदधिम् ।। १३
जगद्रत्नमहाकोशं तुलायां तूलकाल्लघु ।
मायामरीचिशशिनमपि नेक्षणगोचरम् ।। १४
अनन्तमपि निष्पारं न च क्वचिदपि स्थितम् ।
आकाशे वनविन्यासनगनिर्माणतत्परम् ।। १५
अणीयसामणीयांसं स्थविष्ठं च स्थवीयसाम् ।
गरीयसां गरिष्ठं च श्रेष्ठं च श्रेयसामपि ।। १६
अकर्तृकर्मकरणमकारणमकारकम् ।
अन्तःशून्यतयैवैतच्चिराय परिपूरितम् ।। १७
जगत्समुद्गकमपि नित्यं शून्यमरण्यवत् ।
अनन्तशैलकठिनमप्याकाशलवान्मृदु ।। १८
प्रत्येकं प्रत्यहं प्रायः पुराणं पेलवं नवम् ।
आलोकमन्धकाराभं तमस्त्वालोकमाततम् ।। १९
प्रत्यक्षमपि दुर्लक्ष्यं परोक्षमपि चाग्रगम् ।
चिद्रूपमेव च जडं जडमेव चिदात्मकम् ।। २०
अहमेवानहंभावमनहं वाऽहमेव च ।
अन्यदेव तदेवाहमहमेवान्यदेव तत् ।। २१
अस्य पूर्णार्णवस्यान्तरिमे त्रिभुवनोर्मयः ।
स्फुरन्त इव तिष्ठन्ति स्वभावद्रवतात्मकाः ।। २२
बिभर्ति सर्वमङ्गस्थं तुषारमिव शुक्लताम् ।
भाति सर्वस्त्वनेनैव तुषारेणेव शुक्लता ।। २३

अदेशकालावयवोऽप्येष देवो दिवानिशम् ।

असज्जगत्तनोतीव यथा वारितरङ्गकम् ।। २४

एतस्मिन्विकसन्तीमा विपुलाकाशकानने ।

जगज्जरठमञ्जर्यः प्रसरत्पत्रपञ्चकाः ।। २५

एष स्वप्रतिबिम्बस्य स्वयमालोकनेच्छया ।

अत्यन्तनिर्मलाकारः स्वयं मुकुरतां गतः ।। २६

व्योमवृक्षफलस्यास्य स्वेच्छावयव उज्ज्वला ।

सर्गोपलम्भ उद्यच्च चमत्कुर्वन्ति संविदि ।। २७

अन्तस्थेन बहिष्ठेन नानानानातयात्मनि ।

एष सोऽन्तर्बहिर्भाति भावाभावविभावया ।। २८

एतद्रूपा पदार्थश्रीरेतस्मिन्नेतदिच्छया ।

चमत्करोत्येतदर्थं जिह्वेव स्वास्यकोटरे ।। २९

अस्याम्भसो द्रवत्वं यत्तदिदं जगदुच्यते ।

संवित्स्यादूपलम्भाङ्गं भुवनावर्तवृत्तिमत् ।। ३०

शाम्यत्यत्र पदार्थश्रीः सर्वासामेव भास्वति ।

एतस्मादेव चोदेति स्वालोक इव तेजसः ।। ३१

इदमेव जगत्सर्वं शुक्लत्वं तुहिने यथा ।

अत एताः प्रवर्तन्ते विद इन्दोरिवांशवः ।। ३२

एतस्माद्रङ्गतोऽनङ्गाज्जगच्चित्रमिदं स्थितम् ।

विद्ध्यभावविकारादिशान्तमेतन्मयं ततम् ।। ३३

अस्माद्वनतरोरेताः स्वरूढा गगनाङ्गणे ।

दृश्यशाखाः प्रवर्तन्ते जगज्जालगुलुच्छकाः ।। ३४

व्ययोदयवती नूनमत्र दृश्यतरङ्गिणी ।

नानातानन्तकुसुमा वहत्यविचलाचले ।। ३५

अस्मिन्व्योमात्मके रङ्गे भुवनाभिनयभ्रमैः ।

मृत्यत्यविरतारम्भं वारैर्नियतिनर्तकी ।। ३६
जगत्कोटिमहाकल्पकल्पोन्मेषनिमेषणः ।
विताने नाट्यते भूयो जन्यते कालबालकः ।। ३७
उद्यत्स्वपि जगत्स्वेष शान्तमेवावतिष्ठते ।
अनिच्छ एव मुकुरः प्रतिबिम्बशतेष्विव ।। ३८
भूतानां वर्तमानानां सर्गाणां संभविष्यताम् ।
एषोऽकारणकं बीजं सर्गाणामिव कारणम् ।। ३९
अस्योन्मेषो जगल्लक्ष्मीर्निमेषः प्रलयागमः ।
अनुन्मेषनिमेषोऽसावात्मन्येवावतिष्ठते ।। ४०
उद्यन्त्यमूनि सुबहूनि महामहान्ति
सर्गागमप्रलयजन्मदशा जगन्ति ।
सर्वाणि तान्ययमपारस्वरूप एव
प्रस्पन्दनानि मरुदेव यथास्व शान्तम्।। ४१
इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे उ० परब्रह्मस्वरूपवर्णनं नाम पञ्चत्रिंशः सर्गः ।। ३५ ।।